CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सूर्य्यशतकम् ।

महाकवि श्रीमयूर भट्ट कृतम् ।

कलिकातानगरे
श्रीयुतबाबुभुवनचन्द्रबसाक संस्थापित
संवाद ज्ञानरत्नाकराख्य यन्त्रे
तद्द्वारैव १९३१ संवत्सरे
मुद्रितम् ।

2609

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सूर्य्यशतकम्।

रश्मिवर्णनम्।

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः॥१॥
भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां
लक्ष्मीमाकर्ष्टुकामा इव कमलवनोद्घाटनं कुर्वते ये।
कालाकारान्धकाराननपतितजगत्साध्वसध्वंसकल्याः
कल्याणं वः क्रियासुः किसलयचयस्ते करा भास्करस्य॥२॥
गर्भेष्वम्भोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतन्तः
प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव।
निष्पर्यायं प्रवृत्तास्त्रिभुवनभवनप्राङ्गणे पान्तु युष्मान्
उष्माणं सन्तताध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः॥३
प्रभ्रश्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य वीतावृतीन्प्राग्
जन्तूंस्तन्तून्यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ते सान्द्रीभूय सद्यः क्रमविशददशाशादशालीविशालं
शश्वत्सम्पादयन्तोऽम्बरममलमलं मङ्गलं वो दिशन्तु॥
न्यक्कुर्वन्नोषधीशे मुषितरुचि शुचेवौषधीः प्रोषिताभा
भास्वद्ग्रावोद्गतेन प्रथममिव कृताभ्युद्गतिः पावकेन ।
पक्षच्छेदव्रणासृक्स्रुत इव दृषदो दर्शयन् प्रातरद्रेर्
आताम्रस्तीव्रभानोरनभिमतनुदे स्ताद्गभस्त्युद्गमो वः॥५
शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्
दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम्॥६
बिभ्राणा वामनत्वं प्रथममथ तथैवांशवः प्रांशवो वः
क्रान्ताकाशान्तरालास्तदनु दशदिशः प्रसृतास्ततोऽपि।
ध्वान्तादाच्छिद्य देवद्विष इव बलितो विश्वमाश्वश्नुवानः
कृच्छ्राण्युच्छ्रायहेलोपहसितहरयो हारिदश्वा हरन्तु॥
उद्गाढेनारुणिम्ना विदधति बहुलं येऽरुणस्यारुणत्वं
मूर्द्धोद्धूतौ खलीनक्षतरुधिररुचो ये रथाश्वाननेषु।
शैलानां शेखरत्वं श्रितशिखरिशिखास्तन्वते ये दिशन्तु
प्रेङ्खन्तः खे खरांशोः खचितदिनमुखास्ते मयूखाः सुखं वः॥
दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

बन्धध्वंसैकहेतुं शिरसि नतिवशाद्बद्धसन्ध्याञ्जलीनां
लोकानां ये प्रबोधं विदधति विपुलाम्भोजखण्डाशयेव।
ते युष्माकं स्वचित्तप्रथिमपृथुतरप्रार्थनाकल्पवृक्षाः
कल्पन्तां निर्विकल्पं दिनकरकिरणाः केतवः कल्मषस्य॥
धारा रायोऽधनायापदि सपदि करालम्बभूताः प्रपाते
तत्त्वालोकैकदीपास्त्रिदिवपतिपुरप्रस्थितौ वीथ्य एव।
निर्वाणोद्योगियोगिप्रगमनिजतनुद्वारि वेत्रायमाणा
स्त्रायन्तां तीव्रभानोर्दिवसमुखसुखा रश्मयः कल्मषाद्वः॥
प्राचि प्रागाचरन्त्योऽनतिचिरमचले चारुचूडामणित्वं
मुञ्चन्त्यो रोचनाम्बु प्रचुरमिव दिशामुच्चकैश्चर्चनाय॥
चाटूत्कैश्चक्रनाम्नां चतुरमविचलैर्लोचनैरर्च्यमाना
श्चेष्टन्तां चिन्तितानामुचितमचरमाश्चण्डरोचीरुचो वः
एकं ज्योतिर्दृशौ द्वे त्रिजगति गदितान्यब्जजास्यैश्चतुर्भिर्
भूतानां पञ्चमं यान्यलमृतुषु तथा षट्सु नानाविधानि
युष्माकं तानि सप्त त्रिदशमुनिनुतान्यष्टदिग्भाञ्जि भानोर्
यान्ति प्राह्णे नवत्वं दश दधतु शिवं दीधितीनां शतानि।
आवृत्तिभ्रान्तविश्वाः श्रममिव दधतः शोषिणः स्वोष्मणैव
ग्रीष्मे दावाग्नितप्ता इव रसमसकृद्ये धरित्र्या धयन्ति
ते प्रावृष्यात्तपानातिशयरुज इवोद्वान्ततोया हिमर्तौ
मार्तण्डस्याप्रचण्डाश्चिरमशुभभिदेऽभीषवो वो भवन्तु॥
तन्वाना दिग्वधूनां समधिकमधुरालोकरम्यामवस्था
मारूढप्रौढिलेशोत्कलितकपिलिमालङ्कृतिः केवलैव।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

उज्जृम्भाम्भोजनेत्रद्युतिनिदिनमुखे किञ्चिदुद्भिद्यमाना
श्मश्रुश्रेणीवतासां दिशतु दशशती शर्मघर्मत्विषो वः ॥
मौलीन्दोर्मैवमोषीद्द्युतिमिति वृषभाङ्केन यः शङ्किनेव
प्रत्यग्रोद्घाटिताम्भोरुहकुहरगुहासुस्थितेनेव धात्रा ।
कृष्णेन ध्वान्तकृष्णस्तनुपरिभवत्रस्नुनेव स्तुतोऽलं
त्राणाय स्तात्तनीयानपि तिमिररिपोः सत्विषामुद्गमो वः ॥
विस्तीर्णं व्योम दीर्घाः सपदि दश दिशो व्यस्तवेलाम्भसोऽब्धीन्
कुर्वद्भिर्दृश्यमानां नगनगरगणाभोगपृथ्वीञ्च पृथ्वीं ।
पद्मिन्युच्छ्वास्यते यैरुषसि जगदपि ध्वंसयित्वा तमिस्रा
मुस्रा विस्रंसयन्तु द्रुतमनभिमतं ते सहस्रत्विषो वः ॥
अस्तव्यस्तत्वशून्यो निजरुचिरनिशानश्वरः कर्तुमिशो
विश्वं वेश्मेव दीपः प्रतिहततिमिरं यः प्रदेशे स्थितोऽपि ।
दिक्कालापेक्षयासौ त्रिभुवनमटतस्तिग्मभानोर्नवाख्यां
यातः शातक्रतव्यां दिशि दिशतु शिवं सोऽर्चिषामुद्गमो वः ॥
मा गान्म्लानिं मृणाली मृदुरिति दययेवाप्रविष्टोऽहिलोक
लोकालोकस्य पार्श्वं प्रतपति न परं यस्तदाख्यार्थमेव ।
ऊर्ध्वं ब्रह्माण्डखण्डस्फुटनभयपरित्यक्तदैर्घ्यो द्युसीम्नि
स्वेच्छावश्यावकाशावधिरवतु स वस्तापनो रोचिरोघः ॥
अश्यामः कालएको न भवति भुवनान्तेऽपि वीतेऽन्धकारे
सद्यः प्रालेयपादो न विलयमचलश्चन्द्रमाश्चाभ्युपैति ।
बद्धःसिद्धाञ्जलिनां नहि कुमुदवनस्यापि यत्रोज्जिहाने
तत्प्रातः प्रेक्षणीयं दिशतु दिनपतेर्धामकामादिकं वः ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यत्कान्तिं पङ्कजानां न हरति कुरुते प्रत्युताधिक्यरम्यां
नो धत्ते तारकाभां तिरयति नितरामाशु यन्नित्यमेव।
कर्तुं नालं निमेषं दिवसमपि परं यत्तदेकं त्रिलोक्याश्
चक्षुः सामान्यचक्षुर्विसदृशमघभिद्भास्वतस्तान्महो वः॥

क्ष्मां क्षेपीयः क्षपाम्भःशिशिरतरजलस्पर्शतर्षादृतेव
द्रागाशा नेतुमाशाद्विरदकरसरः पुष्कराणीव बोधम्।
प्रातः प्रोल्लंघ्य विष्णोः पदमपि घृणये गतिवेगाद्दवीय
स्युद्दामद्योतमाना दहतु दिनपतेर्दुर्निमित्तं द्युतिर्वः॥

नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि गम्या
गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता नो तमःकज्जलेन
प्राप्तोत्पत्तिः पतङ्गान्न पुनरुपगता मोषमुष्णत्विषो वो
वर्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः

निःशेषाशावपूरप्रवणगुरुगुणश्लाघनीयस्वरूपा
पर्याप्तं नोदयादौ दिनगमसमयोपप्लवेऽप्युन्नतेव।
अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं
ब्रध्नस्येद्धा रुचिर्वो रुचिरिव रचितस्याप्तये वस्तुनोऽस्तु॥

बिभ्राणः शक्तिमाशु प्रशमितबलवत्तारकौर्जित्यगुर्वीं
कुर्वाणो लीलयाधःशिखिनमपि लसच्चन्द्रकान्तावभासं।
आदध्यादन्धकारे रतिमतिशयिनीमावहन् वीक्षणानां
बालो लक्ष्मीमपारामपर इव गुहोऽहर्पतेरातपो वः॥

ज्योत्स्नांशाकर्षपाण्डुद्युतितिमिरमषीशेषकल्माषमीषज्
जृम्भोद्भूतेनपिङ्गं सरसिजरजसा सन्ध्ययाशोणशोचिः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रातःप्रारम्भकाले सकलमिव जगच्चित्रमुन्मीलयन्ती
कान्तिस्तीक्ष्णत्विषोक्ष्णांमुदमुपनयतान्तूलिकेवातताम्र
आयान्ती किं सुमेरोः सरणिरणितापद्मरागैःपरागैर्
आहोस्वित्स्वस्यमाहारजनविरचितावैजयन्तीरथस्य।
माञ्जिष्ठीपृष्ठवाहावलिविधुतशिरश्चामरालीनुलोकैर्
आशङ्क्यालोकितैवं सवितुरघनुदे स्तात्प्रभाते प्रभा वः॥

ध्वान्तध्वंसं विधत्ते न तपतिनितरां नातिरूपं व्यनक्ति
न्यक्त्वं नीत्वापिनक्तं नवितरतितरां तावदह्नस्त्विषं य.।
स प्रातर्माव्यरंसीदसकलपटिमा पूरयन् युष्मदाशा
आशाकाशावकाशावतरणतरुणप्रक्रमोऽर्कप्रकाशः॥२८

तीव्रं निर्वाणहेतुर्यदपि च विपुलं यत् प्रकर्षेण चाग्र
प्रत्यक्षं यत्परोक्षं यदिह यदपरं नश्वरं शाश्वतञ्च।
यत्सर्वस्य प्रसिद्धं जगति कतिपये योगिनो यद्विदन्ति
ज्योतिस्तद्द्विप्रकारं सवितुरवतुवोबाह्यमाभ्यन्तरञ्च॥

रत्नानां मण्डलाय प्रभवति नियते देशलब्धावकाशं
वह्नेर्दीवादिदग्धं निजजडिमतया कर्तुमानन्दमिन्दोः
यत्तु त्रैलोक्यभूषाविधिरघदहनं ह्लादिदृष्ट्याशु तद्वो
बाहुल्योत्पाद्यकार्याधिकतरमवतादेकमेवार्कतेजः॥३०

मीलच्चक्षुर्विजिह्मश्रुतिजडरसनं विघ्नितघ्राणवृत्ति
स्वव्यापाराक्षमत्वक् परिमुषितमनःश्वासमात्रावशेषं।
विस्रस्ताङ्गं पतित्वा स्वपदपहरतादश्रियं वोऽर्कजन्मा
कालव्यालावलीढं जगदगदइवोत्थापयन् प्राक्प्रतापः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

निःशेषं नैशमम्भः प्रसभमपनुदन्नश्रुलेशानुकारि
स्तोकस्तोकापनीतारुणरुचिरचिरादस्तदोषानुषङ्गः ।
दाता दृष्टिं प्रसन्नां त्रिभुवननयनस्याशु युष्मद्विरुद्धं
बध्याद्बध्नस्य सिद्धाञ्जनविधिरपरः प्राक्तनोर्चिःप्रचारः॥

भूत्वाजम्भस्य भेत्तुःककुभिपरिभवारम्भभूःशुभ्रभानोर्
बिभ्राणा बभ्रुभावं प्रसभमभिनवाम्भोजजृम्भा प्रगल्भा।
भूषाभूरिष्ठशोभात्रिभुवनभवनस्यास्यवैभाकरी प्राग्
विभ्रान्तिभ्राजमाना विभवतुविभवोद्भूतये सा विभा वः

संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या
यामिन्या कन्ययेवामृतकरकलशावर्जितेनामृतेन ।
अर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवालाद्
उद्यन्बालप्रवालप्रतिमरुचिरहः पादपप्राक्प्रवालः॥२४

भिन्नं भासारुणस्य क्वचिदभिनवया विद्रुमाणां त्विषेव
भिन्नं नक्षत्ररत्नद्युतिनिकरकरालान्तरालं क्वचिच्च ।
अन्तर्निःशेषकृष्णाश्मयमुदधिमिव ध्वान्तराशिं पिबंस्ता
द्दौर्वः पूर्वोप्यपूर्वोऽग्निरिव भवदघप्लुष्टयेर्कावभासः॥२५

गन्धर्वैर्गद्यपद्यव्यतिकरितवचो हृद्यमातोद्यवाद्यैर्
यो देवो नारदाद्यैर्मुनिभिरभिनुतो वेदवेद्यैर्विभिद्य।
आसाद्यापाद्यते यं पुनरपि च जगद्यौवनं सद्य उद्यन्
उद्योतोद्योतितद्यौर्द्युतु दिवसकृतो सावसद्यानिवोऽद्य॥

आवानैश्चन्द्रकान्तैश्च्युततिमिरतया भानवास्तारकाणाम्
एणाङ्कालोकलोपादुपहतमहसामोषधीनां लयेन ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आरादुत्प्रेक्ष्यमाणाक्षणमुदयतटांतरितस्याहिमांशोर्
आभा प्राभातकी वोऽवतु न तु नितरां तावदाविर्भवंती॥ ३७

सानौ सा नौदयेनारुणितनलपुनर्यैर्विनानां वनानाम्
आलीमालीढपूर्वा परिहृतकुहरोपान्तनिम्नातनिम्ना ।
भावो भावोपशान्तिं दिशतु दिनपतेर्भासमाना समाना
राजी राजीवरेणोः समसमयमुदेतीवयस्या वयस्या ॥

उज्जृम्भाम्भोरुहाणां प्रभवति पयसां या श्रिये नोष्णतायै
पुष्णात्यालोकमात्रं न तु दिशति दृशां दृश्यमाना विघातं ।
पूर्वाद्रेरेव पूर्वं दिवमनु च पुनः पावनी दिङ्मुखानाम्
एनांस्येनी विभासौ नुदतु नुतिपदैकास्पदं प्राक्तनी वः॥ ३८

वाचां वाचस्पतेरप्यचलभिदुचिता चार्यकाणां प्रपंचैर्
वैरिंच्यानां तथोच्चारितरुचिरऋचामाननानां चतुर्णां
उच्चैस्ताम्रांसु वाच्यच्युतिशुचिचरितं यस्य नोष्णैर्विविच्य
प्राच्यं वर्चश्चकास्य चिरमुपचिनुतात्तस्य चण्डार्चिषो वः॥

मूर्ध्न्यद्रेर्धातुरागस्तरुषु किशलयो विद्रुमौघः समुद्रे
दिङ्मातङ्गोत्तमाङ्गेष्वभिनवनिहितः सान्द्रसिन्दूररेणुः ।
सीम्नि व्योम्नश्च हेम्नः सुरशिखरिभुवो जायते यः प्रकाशः
शोणिम्नाऽसौ खरांशोरुषसि दिशतु वः शर्म शोभैकदेशः ।

अस्ताद्रीशोत्तमाङ्गे श्रितशशिनि तमःकालकूटे निपीते
याति व्यक्तिं पुरस्तानकणकिशलये प्रत्युषः पारिजाते ।
उद्यंत्यारक्तपीताम्बरविशदतरोद्वीक्षिता तीक्ष्णभानोर्
लक्ष्मीर्लक्ष्मीरिवास्तु स्फुटकमलपुटापाश्रया श्रेयसे वः॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नोदन्वाञ्जन्मभूमिर्नतदुदरभुवोबान्धवाःकौस्तुभाद्या
यस्याः पाणौ न पद्मं नच नरकरिपूरस्थलीवासवेश्म ।
तेजोरूपा परैव त्रिषु भुवनतटेष्वादधाना व्यवस्थां
साश्रीश्रेयांसिदिश्यादशिशिरमहसोमण्डलाग्रोद्गतावः

अश्ववर्णना ।

रत्नक्षुण्णैर्हैमोपलपटलमलं लाघवादुत्पतन्तः
पातङ्गापङ्गुवत्ताञ्जितपवनजवा वाजिनस्ते जगंति ।
येषांवीतान्यचिह्नोन्वयमपि वहतां मार्गमाख्याति मेरु॥
रुद्यन्नुद्दामदीप्तिद्युमणिमणिशिलावेदिकाजातवेदाः॥४४
प्लुष्टा पुष्टेंशुपातैरतिनिकटतया दत्तदाहातिरेकैर्
एकाहाक्रान्तकृत्स्नत्रिदिवपथपृथुश्वासशोषाः श्रमेण ।
तीव्रोदन्यास्त्वरन्तामहितविहतये सप्तयः सप्तसप्ते
रभ्यासाकाशगङ्गाजलसरलगलावर्जिताग्राननावः॥५
मत्वाऽन्यान्पार्श्वतोऽश्वान्स्फटिकतटदृषद्दृष्टदेहाद्रवंत
व्यस्तेऽहन्यस्तसन्ध्ये यमिति मृदुपदा पद्मरागोपलेषु ।
सादृश्यादश्वमूर्तिर्मरकतकटके क्लिष्टसूता सुमेरोर्
मूर्द्धन्यादिष्टवध्रुवगतिरवतु ब्रध्नवाहावली वः॥४६॥
हेलालोलं वहन्ती विषधरदमनस्याग्रजेनावकृष्टां
सर्वाह्निण्याः सुदूरं जनितजवभयाःस्यन्दनस्य स्यदेन ।
निर्व्याजंतायमाने हरितिमणिनिजे स्फीतफेनाहितश्रीर
श्रेयांस्यश्वपङ्क्तिःशमयतु यमुनेवापरातापनीवः॥४७

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मार्गोपान्ते सुमेरोर्नुवतिकृतनतौनाकधाम्नां निकाये
वीक्ष्य व्रीडावतीनांप्रतिकुहरमुखंकिन्नरीणांमुखानि।
सूते स्रयत्यघोषक्षडगतिबहुतां कन्धरार्द्धैर्वहद्भिर्
वाहानांव्यस्तताक्षःसमसमसमहरद्दूषितंकल्मषाणि ॥
धुन्वन्तोनीरदालीर्निजरुचिहरिताःपार्श्वयोःपक्षतुल्या
स्तानूत्तानैः खलीनैःखचितमुखरुचच्योततालोहितेन।
उड्डीयेव व्रजन्तो वियतिगतिवशादर्कवाहाःक्रियासुः
क्षेमंहेमाद्रिहृद्यद्रुमशिखरशिरःश्रेणिशाखाशुकाभाः

सारथिवर्णना।

प्रातः शैलाग्ररङ्गेरजनिजवनिकापायसंलक्ष्य लक्ष्मीर्
विक्षिप्यापूर्वपुष्पाञ्जलिमुडुनिकरं सूत्रधारायमाणः।
यामेष्वङ्केष्विवाह्नःकृतरुचिषु चतुर्ष्वेवयातः प्रतिष्ठाम
व्यात्प्रस्तावयन्वोजगदटनमहानाटिकां सूर्यसूतः॥५०॥
आक्रान्त्यावाह्यमानंपशुमिवहरिणांवाहकोऽग्र्योहरीणां
भ्राम्यन्तं पक्षपाताज्जगति समरुचिःसर्वकर्मैकसाक्षी।
शक्तं नेतुश्रुतीनामवजयति वयोज्येष्ठभावे समेपि
स्वाम्ना धाम्नांनिधिर्यः सभवदघनुदे नूतनस्तादनूरुः ॥
दत्तार्घैर्दूरनम्रैर्वियति विनयतो वीक्षितः सिद्धसङ्घैः
स्नानार्घ्यं सारथिर्वः सु दशशतरुचेःसातिरेकं करोतु।
आपीय प्रातरेव प्रततहिमपयःस्यन्दिनीरिन्दुभासो
यःकाष्ठादीपनोग्रे जडिनइवभृशं सेवते पृष्ठतोऽर्कम्॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मुञ्चन्नश्मीन् दिनादौ दिनगमसमये संहरंश्च स्वतन्त्र
स्लोकप्रख्यातवीर्य्यो विततहरिपराक्रान्तिवद्धाभियोगः।
कालोत्कर्षाल्लघुत्वंप्रसभमधिपतौ योजयन् यो द्विजानां
सेवाप्रीतेन पूष्णा स्वसम इवकृतस्त्रायतां सोऽरुणो वः॥
प्रातः श्यामालतायाः परशुरिवतमोऽरण्यवह्नेरिवार्चिः
प्राच्यग्रे प्राग्ग्रहीतुं ग्रहकुमुदवनं प्रागुदस्तो ग्रहस्तः।
ऐक्यं भिन्दन् द्युभूम्योरवधिरिव विधात्रेव विश्वप्रबोधं
वाहानां वोविनेता व्यपनयतु विपन्नाम धामाधिपस्य॥
पौरस्त्यस्तोयदर्त्तोः पवनइव पतन् पावकस्येव धूमो
विश्वस्येवादिसर्गः प्रणवइव परं पावनं वेदराशेः।
सन्ध्यानृत्योत्सवेच्छोरिवमदनरिपोर्नन्दिनान्दीनिनादः
सौरस्याग्रे सुखंवोवितरतु विनतानन्दनःस्यन्दनस्य॥
पर्य्याप्तं तप्तचामीकरकटकतटीश्लिष्टशीतेतरांशा
वासीदत् स्यन्दनाश्वानुकृतिमरकते पद्मरागायमाणः
यःसोत्कर्षां विभूषांकुरुतइव कुलक्ष्माभृदीशस्यमेरोर्
एनांस्यह्नाय दूरं शमयतु स गुरुः काद्रवेयद्विषो वः॥
नीत्वाश्वान् सप्तकत्वादिव नियमवशं वेत्रकल्पप्रतोद
स्तूर्णं ध्वान्तस्यराशावितरजनइवोत्सारिते दूरभाजि।
पूर्वं प्रष्ठो रथस्य क्षितिभृदधिपतीन् दर्शयंस्त्रायतां व
स्त्रैलोक्यास्थानदानोद्यतदिवसपतेःप्राक्प्रतीहारपालः
वज्रिन्जातंविकाशीक्षणकमलवनं भासिनो भासि वह्ने
तातं नत्वाश्वपार्श्वान्नय यम हिषं राक्षसा वीक्षिताःस्थ,

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सप्तीन् सिञ्च प्रचेतः पवन भज जवं वित्तपावेदितस्त्वं
वन्देशश्चैतिजल्पन्प्रतिदिशमधिपान्पातुपूष्णोग्रणीर्वः ॥
पाशानाशान्तपालादरुण वरुणतो मा गृहीः प्रगृहाण
तृष्णांकृष्णाश्वचक्रे जहिहिनहिरथो यातिमेनैकचक्रः
योक्तुं युग्मं किमुच्चैःश्रवसमभिलषस्यष्टमं त्वंशशालास्
त्यक्त्वान्यापेक्षविश्वोपकृतिरितिरविःशास्त्ययंसोऽताद्वः ॥
नोमूर्च्छा छिन्नवाञ्छः श्रमविवशवपुर्नैवमप्यास्य शोषी
पान्थः पथ्येतराणि क्षपयतु भवतां भ्राम्यतोऽग्रेसरः सः ।
यःसंस्थित्यत्रिलोकीमटति पटुतरैः श्लाघ्यमानो मयूखैर्
आरामदामलेखामिव हरितमणिश्यामलामश्वपंक्तिं ॥
शीदन्तोन्तर्निमज्जज्जडखुरमुपलाः सैकतेनाकनद्या
स्कन्दन्तःकन्दरालीःकनकशिखरिणोमेखलासुस्खलंतः
दूरं दूर्वास्थलोत्का मरकतदृषदिश्यासुरो यन्न याताः
पूष्णोश्वाः पूरयंस्तैस्तदवतु जवनैर्हुंकृतेनाग्रगीर्वः॥६२॥
पीनोरःप्रेरिताश्वैश्चरमखुरपुटप्रस्थितैः प्रातरद्रा
वादीर्घाङ्घ्रोरदस्तोहरिभिरपगतासङ्गनिःशब्दचक्रः
उत्तानानूरुमूर्द्धावनतिहठभवद्विप्रतीपप्रणामः
प्राह्णे श्रेयोविधत्तांसवितुरवतरन् व्योमवीथीं रथोवः ॥
उत्कीर्णस्वर्णरेणुद्रुतखुरदलितापार्श्वयोः शश्वदश्वैर्
अश्रान्तभ्रान्तचक्रक्रमनिखिलमिलन्नेमिनिम्नामरेण
मेरोर्मूर्द्धन्यघं वो विघटयतु रवेरेकवीथी रथस्य
स्वोष्मोदस्ताम्बुरिक्तप्रकटितपुलिनोद्धूसरा स्वर्धुनीवः ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ध्वान्तौघध्वंसदीक्षाविधिगुरुवहतामाक्सहस्रंकराणाम्
अर्य्यम्णा यो गरिम्णः पदमतुलमुपानीयताध्यासनेन ।
सम्भ्रान्तानां नितान्तं भरमिव मरुतामक्षमाणां विषोढुं
स्कन्धात्स्कन्धंव्रजन्वोऽटजिनविहतयेभास्वतःस्यन्दनोऽस्तु॥
योक्त्रीभूतान्युगस्य ग्रसितुमिव पुरोदन्दशूकान्दधानो
द्वेधाव्यस्ताम्बुवाहावलिविहितटहत्पक्षविक्षेपशोभः ।
सावित्रः स्यन्दनोऽसौ निरतिशयरयप्रीणितानूरुरेनः
क्षेपी यो वो गरुत्मानिव हरतु हरीच्छाविधेयप्रचारः॥
धूर्ध्वस्ताग्र्यग्रहाणि ध्वजपटपवनान्दोलितेन्दूनि दूरं
राहौ ग्रासाभिलाषादनुसरति पुनर्दत्तचक्रव्यथानि।
श्रान्ताश्वश्वासहेलाधुतविबुधधुनीनिर्झराम्भांसि भद्रं
देयासुर्वो दवीयो दिविदिवसपतेःस्यन्दनप्रस्थितानि॥
अक्षेरक्षां निबध्य प्रतिसरवलयैर्योजयन्त्यो युगाग्रं
धूलम्बे दग्धधूपाः प्रतिहतसुमनो गोचरे कूवरस्य ।
चर्चाश्चक्रे ददत्यो मलयजरजसा सिद्धसाध्यास्त्रिसंध्यं
वन्दन्ते यं द्युमार्गे स दहतु दुरितान्यंशुमत्स्यन्दनो वः॥
नन्तुं नाकालयानामनिशमुपनताम्पद्धतिः पंक्तिरेव
क्षोदे नक्षत्रराशेरकृशरयमिलच्चक्रपिष्टस्य धूलिः ।
हेषाह्रादो हरीणां सुरशिखरिदरीः पूरयन्नेमिनादो
यस्याव्यात्तीव्रभानोःसदिविभुवियथाव्यक्तचिह्नोरथोवः॥
एकाह्नैव दीर्घां त्रिभुवनपदवीं लङ्घयन् यो लघिष्ठः
पृष्ठेमेरोर्गरीयान्दलितमणिदृषत्त्वीषिपिंषन्शिरांसि।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यः सर्व्वस्योपरिष्टादथच पुनरधस्तादिवास्ताद्रिमूर्द्धि
ब्रह्मस्याव्यात्सएवंदुरधिगमपरिष्यन्दनः स्यन्दनोवः ॥
निष्पन्दानां विमानावलिविततदिशां देववृन्दारकानां
वृन्दैरानन्दसान्द्रोद्यममपि वहतां विन्दतां वन्दितुं नो।
मन्दाकिन्याममन्दः पुलिनभृति मृदुर्मन्दरे मन्दराभे
मन्दारैर्मण्डितारं दधदभिदिनकृत्स्यन्दनस्तान्मुदे वः॥
चक्रीचक्रारपंक्तिंहरिरपिचहरीन्धूर्जटिर्धूर्ध्वजाग्रान्
अक्षं नक्षत्रनाथोरुणमपि वरुणः कूवराग्रं कुवेरः ।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौतिप्रीतिप्रसन्नोन्वहमहिमरुचेःसोवतात्स्यन्दनोवः॥
नेताहीनेन मूले विहितपरिकरः सिद्धसाध्यैर्मरुद्भिः
पादोपान्ते स्तुतोऽलं वलिहरिरभसाकर्षणाबद्धवेगः ।
भ्राम्यन्व्योमाम्बुराशावशिशिरकिरणस्यन्दनः सन्ततंवोः
दिश्यात्क्षेमतुल्यामभुनितमहिमेवापरो मन्दराद्रिः ॥

मण्डलवर्णना ।

यज्ज्यायोवीजमह्नामपहृततिमिरं चक्षुषामञ्जनंयत्
यद्द्वारंमुक्तिभाजां यदखिलभुवनज्योतिषामेकमोकः।
यद्वृष्ट्यम्भोनिधानं धरणिरससुधापानपात्रं महद्भिद्
दिश्यादीशस्यभासां तदविकलमलं मण्डलं मङ्गलं वः॥
वेलावृद्धिं व्यधुसिन्धोः पयइव खमिवाहोर्द्धृतोगगनहोडु
स्तोमोच्छिन्नस्वचिह्नप्रसवमिवमधोराशिमस्यन् महांसि।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रातः पुष्णोऽशुभानि प्रशमयतु शिरःशेखरीभूतमद्रेः
पौरस्त्यस्योद्गमस्तोस्तिमिततमतमःखण्डनंमण्डलं वः ॥

प्रत्युप्तस्तप्तहेमोज्ज्वलरुचिरचलः पद्मरागेण येन
ज्यायः किञ्जल्कपुञ्जं यदलिकुलसितैरम्बरेन्दीवरस्य।
कालव्यालस्य चिह्नं महिततममहोमूर्ध्निरत्नं महत्तत्
दीप्तांशोःप्रातरव्यात्तदविकलजगन्मण्डलंमङ्गलं वः ॥

कस्नाता तारकानां पतति तनुरवश्यायबिन्दुर्यथेन्दु
र्विम्लाना दृक्स्मरारेरुरसिमधुरिपोःकौस्तुभोनोगभस्तिः
यत्पर्य्यायेण लोकानवति च जगतां जीवितं यश्च तद्वो
वह्नेः सापह्नुतेव द्युतिरुदयगते यत्र तन्मण्डलं वो
मार्तण्डीयंपुनीयाद्दिविभुविच तमांसीवमुष्णन्महांसि॥

यत्प्राच्यांप्राक्चकास्तिप्रसरतिचयतःप्राच्यसावुज्जिहान।
दिग्धं मध्ये यदह्नोभवति ततरुचा येनचोत्पाद्यतेऽहः।
विश्वानुग्राहि विश्वंसृजदपि च रवेर्मण्डलं मुक्तयेस्तु ॥

शुष्यन्त्यूटान्धकाराभकरवसतयोमारवीणां स्थलीनां
येनोत्तप्ताःस्फुटन्तस्तडितितिलतुलांयान्त्यगेन्द्रायुगान्ते
तच्चण्डांशोरकाण्डत्रिभुवनदहनाशङ्कया धाम कृत्स्नं
संहृत्यालोकमात्रंप्रलघुनिदधतस्तान्मुदेमण्डलं वः ॥

उद्यद्यूद्यानवाप्यां बहुलततमतःपङ्कपूरं विदार्य
प्रोद्भिन्नं पत्रपार्श्वेष्वविमलमरुणच्छायया विस्फुरन्त्या।
कल्याणानिक्रियाद्वःकमलमिवमहन्मण्डलंचण्डभानोर्
अन्वीतंदीप्तिहेतोरसकृदलिकुलाकारिणाराहुणायत्॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

चक्षुर्दक्षद्विषो यन्न तु दहति पुरा पूरयत्येव कामं
नास्तंयुष्टंमलक्ष्मि र्यदिहनियमिनांयानपत्रं भवाब्धौ।
यद्वीतभ्रान्तिशश्वद्भ्रमदपिजगतांभ्रान्तिमद्भ्रान्तिहन्ति
ब्रह्मस्याव्याद्विरुद्धक्रियसमथचहिताधायि तन्मण्डलं वः ॥
सिद्धैः सिद्धान्तमिश्रं श्रितविधिविबुधैश्चारणैश्चाटुगर्भं
गीत्या गन्धर्वमुख्यैर्मुहुरहिपतिभिर्यातुधानैर्यतात्मा ।
सार्ध्यं साध्यैर्मुनीन्द्रैर्मुदिततममनोमोर्मिभिः पक्षपातात्
प्रातः प्रारभ्यमानस्तुतिरवतु रविर्विश्ववंद्योदयोवः ॥
भासामासन्नभावाधिकतरपटुलक्ष्मक्रमालस्य पातात्
छेदाच्छिन्नगच्छत्तुरगखरपुटन्यासनिःशङ्कटङ्कैः ।
निःशङ्कस्यन्दनाङ्कभ्रमणनिकषणात्पातु वस्त्रिप्रकारं
तप्तांशुस्तत्परीक्षापरइव परितः पर्यटन् हाटकाद्रिं ॥
नोशुष्कंनाकनद्याविकसितकनकाम्भोरुहाभाजितन्तुः
लुष्टानैवोपभोग्या भवति भृशतरं नन्दनोद्यानलक्ष्मी ।
नोशृङ्गाणि द्रुतानिद्रुतममरगिरेः कामधौतानि धौता
नोद्धं धामद्युमार्गम्मदयतिदययायःसवोव्यादिनोवः ॥
ध्वान्तस्यैवान्तहेतुर्नभवति मलिनैकात्मनःपाप्मनोपि
प्राक्पादोपान्तभाजां जनयतिनपरम्पङ्कजानामबोधं।
कर्ता निःश्रेयसानामपि ननु खलु यः केवलंवासराणां
सोव्यादेकोद्यमेच्छाविहितबहुफलद्विस्वकार्य्योर्य्यभावः
लोठल्लोष्टाविचेष्टः श्रितशयनतलो निःसहीभूतदेहः
सन्देहीप्राणितव्येसपदिदशदिशःप्रेक्षमाणेऽन्धकाराः।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

निःश्वासायासनिष्ठःपरमपरवशोजायते जीवलोकः
शोकेनैवान्यलोकोभ्युदयकृतिगतेयत्रसोऽकोऽवताद्वः ॥
कामन्नोलोपिलोकांस्तदुपकृतिकृतावास्थितःस्थैर्यकोटीं
नृणां दृष्टिं विजिह्मां विदधदपि करोत्यन्तरत्यन्तभद्रां।
यस्तापस्यापि हेतुर्भवतिनियमिनामेकनिर्वाणदायी
भूयात्सप्रागवस्थाधिकतरपरिणामोदयोऽर्कःश्रियेवः॥
व्यापन्नर्तुन्नकालो व्यभिचरति फलं नौषधीवृष्टिरिष्टा
नेष्टैस्तुष्यन्ति देवा नहिवहतिमरुन्निर्मलाभानिभानि।
आशाःशान्तानभिन्दन्त्यवधिमुदधयोबिभ्रतिक्ष्मामृताक्ष्मां
यस्मिंस्त्रैलोक्यमेवंनचलतितपतिस्तात् ससूर्यःश्रियेवः॥
कैलासे कृत्तिवासा विहरतिविरहत्रासदेहोढकान्तः
श्रान्तःशेतेमहाहावब्धिजलधिविनाक्रमनापद्मनाभः ।
योगोद्योगैकतानो गमयति सकलं वासरं स्वं स्वयम्भू-
र्भूरित्रैलोक्यचिंतास्थितिभुवनविधौयत्रभास्वान्सवोव्यात्
एतद्यन्मण्डलं खेतपतिदिनकृतस्ताऋचोऽर्चींषियानि
द्योतन्तेतानिसामान्यथमपिपुरुषोमण्डलेसुर्यजूंषि ।
एवं यं वेद वेदत्रितयमयमयं वेद वेदीसमग्रो
वर्गःस्वर्गापवर्गप्रकृतिरविकृतिः सोस्तुसूर्यः श्रियेवः॥
नाकौकः प्रत्यनीकक्षतिपटुमहसां वासवाग्रेसराणां
सर्वेषां साधुपातां जगदिदमदितेरात्मजत्वे समेपि ।
येनादित्याभिधानं निरतिशयगुणो नाममन्यस्तमस्तु
स्तुत्यत्रैलोक्यवन्द्यैस्त्रिदशमुनिगणैः सोऽशुमान्श्रेयसेवः॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

भूमिं धाम्नाभिवृष्ट्या जगति जलमयीं पावनीं संस्मृताव
वाग्नेयीं दाहशक्तिं मुक्तेरपि यजमानात्मिकां प्रार्थितानां ।
लीलामाकाश एवामृतकरघटितं ध्वान्तपक्षस्य पर्वन् न्त
एवं सूर्योऽष्टभेदो भवद्भव भवतः पातु बिभ्रत्स्वमूर्त्तिं॥ ९१ ॥
प्राक्कालोन्निद्रपद्माकरपरिमलनाविर्भवत्पादशोभो
भक्त्यात्यक्ताकखेदोऽङ्गतिर्दिविविनतासूनुना नीयमानः ।
सम्प्राप्यास्तापरान्तान्यधिकमधरयन्योजयन्तिस्तुतोऽलं
देवैर्देवः सपायादपरइव मुरावातिरह्नां पतिर्वः॥ ९२॥
यः स्रष्टापां परस्तादचलवरसमभ्युन्नतेर्हेतुरेको
लोकानांयस्त्रयाणांस्थितउपरिपदे दुर्विलंघ्येन धाम्ना ।
सद्यः सिद्धैः प्रसन्नद्युतिशुभचतुराशामुखस्ताद्विभक्तो
द्वेधावेधाइवाविष्कृतकमलरुचिः सोऽर्चिषामाकरोवः ॥
साद्रिद्वीनदीशादिशतिदशदिशो दर्शयन्प्राग्दृशोयः
सादृश्यं दृश्यते नो सदशशतदृपि वैदशेयस्य देशे ।
दीप्तांशुर्वः स दिश्यादशिवयुगदशादर्शितद्वादशात्मा
संशास्यश्वांश्च यस्याशयविदतिशयं दन्दशूकासनाद्यः॥
तीर्थानिव्यर्थकानि ह्रदनदसरसीनिर्झराम्भोजिनीनां
नोदन्वन्तो नुदन्ति प्रतिदिनमशुभं शुभ्रपातानुबन्धि ।
आपो नाकापगाया अपि कलुषमुषो मज्जतां नैवयत्र
त्रातुं यातेऽन्यलोकान्सदशतुदिवसस्यैकहेतुर्हितं वः॥
एतत्पातालपङ्कप्लुतमिव तमसा साकमुद्गाढमासीद्
अप्रज्ञाताप्रतर्क्यं निरवगति तथालक्षणं सुप्तमन्तः ।